योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०६५

पञ्चषष्टितमः सर्गः ६५

विद्याधर्युवाच ।
अथ कालेन महता सोऽनुरागो विरागताम् ।
प्राप्तो मम शरच्छान्तौ विरसः पल्लवो यथा ।। १
वृद्ध एकान्तरसिको नीरसः स्नेहवर्जितः ।
भर्ताऽजिह्ममतिर्मौनी किं मन्ये जीवितेन मे ।। २
वरं वैधव्यमाबाल्याद्वरं मरणमेव च ।
वरं व्याधिरथापद्वा नाहृद्यप्रकृतिः पतिः ।। ३
एतावज्जन्मसाफल्यं सौभाग्यमविखण्डितम् ।
रसिकः पेशलाचारो यन्नार्यास्तरुणः पतिः ।। ४
हता नीरसनाथा स्त्री हताऽसंस्कारिणी च धीः ।
हता दुर्जनभुक्ता श्रीर्हता वेश्याहृता च ह्रीः ।। ५
सा स्त्री यानुगता भर्त्रा सा श्रीर्यानुगता सता ।
सा धीर्या मधुरोदारा साधुता समदृष्टिता ।। ६
नाधयो व्याधयो नैव नापदो न दुरीतयः ।
कुर्वन्ति मनसो बाधां दंपत्योरनुरक्तयोः ।। ७
उत्फुल्लाः कुसुमस्थल्यो नन्दनोद्यानभूमयः ।
धन्वायन्ते कुनाथानां विनाथानां च योषिताम् ।। ८
सर्व एव जगद्भावा यथेच्छं गुणलेशतः ।
संत्यज्यन्ते प्रमादात्तु वर्जयित्वा पतिं स्त्रिया ।। ९
स्थिरयौवनया दुःखान्येतानि मुनिनायक ।
भुक्तानि वर्षवृन्दानि पश्य दौर्भाग्यजृम्भितम् ।। 6.2.65.१०
अथ क्रमेण तेनैव सरागो मे विरागताम् ।
आययौ हिमदग्धाया नलिन्या इव नीरसः ।। ११
विरागवासनास्तेन सर्वभावानुरञ्जना ।

तवोपदेशेनेच्छामि मुने निर्वाणमात्मनः ।। १२
अप्राप्ताभिमतार्थानामविश्रान्तधियां परे ।
मरणैरुह्यमानानां जीवितान्मरणं वरम् ।। १३
स मद्भर्ताद्य निर्वाणमीहमानो दिवानिशम् ।
राजा राज्ञेव मनसा मनो जेतुं प्रबुध्यते ।। १४
ब्रह्मंस्तस्य च मद्भर्तुर्मम चाज्ञानशान्तये ।
न्यायोपपन्नया वाचा कुरु स्मरणमात्मनः ओ। १५
यदा मामनपेक्ष्यैव स मद्भर्तात्मनि स्थितः ।
तदा विरागो वैरस्यमनयन्मे जगत्स्थितिम् ।। १६
संसारवासनावेशवर्जितास्मि ततोऽवसम् ।
निबध्याभिमतां तीव्रां व्योमसंचारधारणाम् ०। १७
अर्जयित्वा तथा व्योम्नि गतिं धारणया मया ।
अभ्यस्ता धारणा भूयः सिद्धसङ्गफलप्रदा ।। १८
ततः स्वजगदाधारपूर्वापरनिरीक्षया ।
स्थिताहं धारणां बद्ध्वा सापि सिद्धिं समागता ।। १९
अथ स्वजगतो दृष्ट्वा हृदयं तस्य बाह्यगा ।
अहं दृष्टवती स्थूलां लोकालोकगिरेः शिलाम् ।।6.2.65.२०
एतावतापि कालेन दंपत्योरावयोर्मुने ।
परं द्रष्टुमभूदिच्छा न काचन कदाचन ।। २१
मद्भर्ता केवलं शुद्धवेदार्थैकान्तचिन्तया ।
न च यातं न चायातं वेत्त्यहो विगतैषणः ।। २२
तेनासौ मत्पतिर्विद्वानपि न प्राप्तवान्पदम् ।
अद्य सोऽहं च वाञ्छावः प्रयत्नेन परं पदम् ।। २३
तदेतामर्थिता ब्रह्मन्सफलां कर्तुमर्हसि ।
महतामर्थिनो व्यर्था न कदाचन केचन ।। २४
भ्रमन्ती सिद्धसेनासु सदा नभसि मानद ।
त्वदृते नेह पश्यामि घनाज्ञानदवानलम् ।। २५
ब्रह्मन्विनैव करुणाकरकारणेन
सन्तो यतोऽर्थिजनवाञ्छितपूरणानि ।
कुर्वन्ति तेन शरणागततामुपेतां

मामर्हसीह न तिरस्करणेन योक्तुम् ।। २६

इत्यार्षे श्रीवासिष्ठमहारा० वा० दे० मोक्षो० निर्वाण० उ० पाषाणो० विद्याधरीजन्मव्यवहारवर्णनं नाम पञ्चषष्टितमः सर्गः ।। ६५।।